श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

मन्त्रमहार्णवे पूर्वखण्डे नवमतरङ्गे श्रीरामकृतं

# ॥ श्रीहनुमत्सहस्रनामस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness* *śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीहनुमत्सहस्रनामस्तोत्रम् ॥

ऋषय ऊचुः

ऋषे लोहगिरिं प्राप्तः सीताविरहकातरः।
भगवान् किं व्यधाद्रामस्तत्सर्वं ब्रूहि सत्वरम् ॥ 1 ॥

वाल्मीकिरुवाच

मायामानुषदेहोऽयं ददर्शाग्रे कपीश्वरम्।
हनुमन्तं जगत्स्वामी बालार्कसमतेजसम् ॥ 2 ॥

स सत्वरं समागम्य साष्टाङ्गं प्रणिपत्य च।
कृताञ्जलिपुटो भूत्वा हनुमान् राममब्रवीत् ॥ 3 ॥

हनुमानुवाच

धन्योऽस्मि कृतकृत्योऽस्मि दृष्ट्वा त्वत्पादपङ्कजम्।
योगिनामप्यगम्यं च संसारभयनाशनम् ॥ 4 ॥

पुरुषोत्तम देवेश कर्तव्यं तन्निवेद्यताम्।

श्रीराम उवाच

जनस्थानं कपिश्रेष्ठ कोऽप्यागत्य विदेहजाम् ॥ 5 ॥

हृतवान् विप्रसंवेशो मारीचानुगते मयि।
गवेष्य साम्प्रतं वीर जानकीहरणे परः ॥ 6 ॥

त्वयाऽगम्यो न को देशस्त्वं च ज्ञानवतां वरः।
सप्तकोटिमहामन्त्रमन्त्रितावयवः प्रभुः ॥ 7 ॥

ऋषय ऊचुः
को मन्त्रः किं च तद्ध्यानं तन्नो ब्रूहि यथार्थतः।
कथासुधारसं पीत्वा न तृप्यामः परन्तप॥ 8॥

वाल्मीकिरुवाच
मन्त्रं हनुमतो विद्धि भुक्तिमुक्तिप्रदायकम्।
महारिष्टमहापापमहादुःखनिवारणम्॥ 9॥

अन्यं हनुमतो मन्त्रं सहस्रनामसंज्ञितम्।
जानन्तु ऋषयः सर्वे महादुरितनाशनम्॥ 10॥

यस्य संस्मरणात् सीतां लब्ध्वा राज्यमकण्टकम्।
विभीषणाय च ददावात्मानं लब्धवान् यथा॥ 11॥

ऋषय ऊचुः
सहस्रनामसन्मन्त्रं दुःखाद्यौघनिवारणम्।
वाल्मीके ब्रूहि नस्तूर्णं शुश्रूषामः कथां पराम्॥ 12॥

वाल्मीकिरुवाच
शृण्वन्तु ऋषयः सर्वे सहस्रनामकं स्तवम्।
स्तवानामुत्तमं दिव्यं सर्वार्थस्य प्रकाशकम्॥ 13॥

अस्य श्रीहनुमत्सहस्रनामस्तोत्रमहामन्त्रस्य।
श्रीरामचन्द्रोभगवान् ऋषिः - शिरसि।
अनुष्टुप्छन्दः - मुखे।
हनुमान् परमात्मा देवता - हृदये।
ओं ह्रीं श्रीं ह्रां ह्रौं बीजं - गुह्ये।
श्रीरिति शक्तिः - पादयोः।
लङ्काविध्वंसनायेति कवचम्।

किलि किलि भू भू कारिण इति कीलकम्।
मम सर्वारिष्टनिवारणार्थे जपे विनियोगः॥

ओं ऐं ह्रीं श्रीं हनुमते रामदूताय अङ्गुष्ठाभ्यां नमः।
ओं लङ्काविध्वंसनाय तर्जनीभ्यां नमः।
ओं अञ्जनागर्भसंभूताय मध्यमाभ्यां नमः।
ओं शाकिनीडाकिनीविध्वंसनाय अनामिकाभ्यां नमः।
ओं किलि किलि भू भू कारिणे भीषणाय
हनुमते देवाय कनिष्ठिकाभ्यां नमः।
ओं ऐं ह्रीं श्रीं ह्रां ह्रीं ह्रूं ह्रैं ह्रौं
करतलकरपृष्ठाभ्यां नमः।
एवं हृदयादिन्यासः।
भूर्भुवः सुवरोमिति दिग्बन्धः॥

## ध्यानम्

स्फाटिकाभं स्वर्णकान्तिं द्विभुजं च कृताञ्जलिम्।
कुण्डलद्वयसंशोभिमुखाम्भोजं हरिं भजेत्॥

प्रतप्तस्वर्णवर्णाभं संरक्तारुणलोचनम्।
सुग्रीवादियुतं ध्यायेत् पीताम्बरसमावृतम्॥

गोष्पदीकृतवाराशिं पुच्छमस्तकमीश्वरम्।
ज्ञानमुद्रां च बिभ्राणं सर्वालङ्कारभूषितम्॥

उद्यदादित्यसङ्काशमुदारभुजविक्रमम्।
कन्दर्पकोटिलावण्यं सर्वविद्याविशारदम्॥

श्रीरामहृदयानन्दं भक्तकल्पमहीरुहम्।
अभयं वरदं दोर्भ्यां कलये मारुतात्मजम्॥

## अथ स्तोत्रम्

श्रीरामचन्द्र उवाच
हनुमान् श्रीप्रदो वायुपुत्रो रुद्रोऽनघोऽजरः।
अमृत्युर्वीरवीरश्च ग्रामावासो जनाश्रयः॥ 1 ॥

धनदो निर्गुणः शूरो वीरो निधिपतिर्मुनिः।
पिङ्गाक्षो वरदो वाग्मी सीताशोकविनाशकः॥ 2 ॥

शिवः शर्वः परोऽव्यक्तो व्यक्ताव्यक्तो धराधरः।
पिङ्गकेशः पिङ्गरोमा श्रुतिगम्यः सनातनः॥ 3 ॥

अनादिर्भगवान् देवो विश्वहेतुर्जनाश्रयः।
आरोग्यकर्ता विश्वेशो विश्वनाथो हरीश्वरः॥ 4 ॥

भर्गो रामो रामभक्तः कल्याणः प्रकृतिस्थिरः।
विश्वम्भरो विश्वमूर्तिर्विश्वाकारश्च विश्वपः॥ 5 ॥

विश्वात्मा विश्वसेव्योऽथ विश्वो विश्वहरो रविः।
विश्वचेष्टो विश्वगम्यो विश्वध्येयः कलाधरः॥ 6 ॥

प्लवङ्गमः कपिश्रेष्ठो ज्येष्ठो विद्यावनेचरः।
बालो वृद्धो युवा तत्त्वं तत्त्वगम्यः सखा ह्यजः॥ 7 ॥

अञ्जनासूनुरव्यग्रो ग्रामशान्तो धराधरः।
भूर्भुवस्स्वर्महर्लोको जनोलोकस्तपोऽव्ययः॥ 8 ॥

सत्यमोङ्कारगम्यश्च प्रणवो व्यापकोऽमलः।
शिवो धर्मप्रतिष्ठाता रामेष्टः फल्गुनप्रियः॥ 9 ॥

गोष्पदीकृतवाराशिः पूर्णकामो धरापतिः।
रक्षोघ्नः पुण्डरीकाक्षः शरणागतवत्सलः॥ 10 ॥

जानकीप्राणदाता च रक्षः प्राणापहारकः।
पूर्णसत्त्वः पीतवासाः दिवाकरसमप्रभः॥ **11** ॥

द्रोणहर्ता शक्तिनेता शक्तिराक्षसमारकः।
रक्षोघ्नो रामदूतश्च शाकिनीजीवहारकः॥ **12** ॥

भुभुक्कारहतारातिगर्वः पर्वतभेदनः।
हेतुमान् प्रांशुबीजं च विश्वभर्ता जगद्गुरुः॥ **13** ॥

जगत्त्राता जगन्नाथो जगदीशो जनेश्वरः।
जगत्पिता हरिः श्रीशो गरुडस्मयभञ्जनः॥ **14** ॥

पार्थध्वजो वायुपुत्रोऽमितपुच्छोऽमितप्रभः।
ब्रह्मपुच्छः परब्रह्मापुच्छो रामेष्ट एव च॥ **15** ॥

सुग्रीवादियुतो ज्ञानी वानरो वानरेश्वरः।
कल्पस्थायी चिरञ्जीवी प्रसन्नश्च सदाशिवः॥ **16** ॥

सन्नतिः सद्गतिर्भुक्तिमुक्तिदः कीर्तिदायकः।
कीर्तिः कीर्तिप्रदश्चैव समुद्रः श्रीप्रदः शिवः॥ **17** ॥

उदधिक्रमणो देवः संसारभयनाशनः।
वार्धिबन्धनकृद् विश्वजेता विश्वप्रतिष्ठितः॥ **18** ॥

लङ्कारिः कालपुरुषो लङ्केशगृहभञ्जनः।
भूतावासो वासुदेवो वसुस्त्रिभुवनेश्वरः॥ **19** ॥

श्रीरामदूतः कृष्णश्च लङ्काप्रासादभञ्जकः।
कृष्णः कृष्णस्तुतः शान्तः शान्तिदो विश्वपावनः॥ **20** ॥

विश्वभोक्ता च मारीघ्नः ब्रह्मचारी जितेन्द्रियः।
ऊर्ध्वगो लाङ्गुली माली लाङ्गूलहतराक्षसः॥ **21** ॥

समीरतनुजो वीरो वीरमारो जयप्रदः।
जगन्मङ्गलदः पुण्यः पुण्यश्रवणकीर्तनः ॥ **22** ॥

पुण्यकीर्तिः पुण्यगतिर्जगत्पावनपावनः।
देवेशो जितरोधश्च रामभक्तिविधायकः ॥ **23** ॥

ध्याता ध्येयो नभस्साक्षी चेतश्चैतन्यविग्रहः।
ज्ञानदः प्राणदः प्राणो जगत्प्राणः समीरणः ॥ **24** ॥

विभीषणप्रियः शूरः पिप्पलाश्रयसिद्धिदः।
सुहृत्सिद्धाश्रयः कालः कालभक्षकभर्जितः ॥ **25** ॥

लङ्केशनिधनस्थायी लङ्कादाहक ईश्वरः।
चन्द्रसूर्याग्निनेत्रश्च कालाग्निः प्रलयान्तकः ॥ **26** ॥

कपिलः कपिशः पुण्यराशिर्द्वादशराशिगः।
सर्वाश्रयोऽप्रमेयात्मा रेवत्यादिदिवाकरः ॥ **27** ॥

लक्ष्मणप्राणदाता च सीताजीवनहेतुकः।
रामध्येयो हृषीकेशो विष्णुभक्तो जटी बली ॥ **28** ॥

देवारिदर्पहा होता कर्ता हर्ता जगत्प्रभुः।
नगरग्रामपालश्च शुद्धो बुद्धो निरन्तरः ॥ **29** ॥

निरञ्जनो निर्विकल्पो गुणातीतो भयङ्करः।
हनुमांश्च दुराराध्यस्तपः साध्योऽमरेश्वरः ॥ **30** ॥

जानकीघनशोकोत्थतापहर्ता परात्परः।
वाङ्मयः सदसद्रूपः कारणं प्रकृतेः परः ॥ **31** ॥

भाग्यदो निर्मलो नेता पुच्छलङ्काविदाहकः।
पुच्छबद्धयातुधानो यातुधानरिपुप्रियः ॥ **32** ॥

छायापहारी भूतेशो लोकेशः सद्गतिप्रदः।
प्लवङ्गमेश्वरः क्रोधः क्रोधसंरक्तलोचनः॥ **33** ॥

क्रोधहर्ता तापहर्ता भक्ताभयवरप्रदः।
भक्तानुकम्पी विश्वेशः पुरुहूतः पुरन्दरः॥ **34** ॥

अग्निर्विभावसुर्भास्वान् यमो निर्ऋतिरेव च।
वरुणो वायुगतिमान् वायुः कौबेर ईश्वरः॥ **35** ॥

रविश्चन्द्रः कुजः सौम्यो गुरुः काव्यः शनैश्चरः।
राहुः केतुर्मरुद्धोता धाता हर्ता समीरजः॥ **36** ॥

मशकीकृतदेवारिः दैत्यारिर्मधुसूदनः।
कामः कपिः कामपालः कपिलो विश्वजीवनः॥ **37** ॥

भागीरथीपदाम्भोजः सेतुबन्धविशारदः।
स्वाहा स्वधा हविः कव्यं हव्यकव्यप्रकाशकः॥ **38** ॥

स्वप्रकाशो महावीरो लघुश्चाऽमितविक्रमः।
प्रडीनोड्डीनगतिमान् सद्गतिः पुरुषोत्तमः॥ **39** ॥

जगदात्मा जगद्योनिर्जगदन्तो ह्यनन्तकः।
विपाप्मा निष्कलङ्कश्च महान् महदहङ्कृतिः॥ **40** ॥

खं वायुः पृथिवी ह्यापो वह्निर्दिक्पाल एव च।
क्षेत्रज्ञः क्षेत्रपालश्च पल्वलीकृतसागरः॥ **41** ॥

हिरण्मयः पुराणश्च खेचरो भूचरो मनुः।
हिरण्यगर्भः सूत्रात्मा राजराजो विशाम्पतिः॥ **42** ॥

वेदान्तवेद्योद्गीधश्च वेदवेदाङ्गपारगः।
प्रतिग्रामस्थितिः साध्यः स्फूर्तिदाता गुणाकरः॥ **43** ॥

नक्षत्रमाली भूतात्मा सुरभिः कल्पपादपः।
चिन्तामणिर्गुणनिधिः प्रजापतिरनुत्तमः॥ 44 ॥

पुण्यश्लोकः पुरारातिर्ज्योतिष्मान् शर्वरीपतिः।
किलिकिल्यारवत्रस्तभूतप्रेतपिशाचकः॥ 45 ॥

ऋणत्रयहरः सूक्ष्मः स्थूलः सर्वगतः पुमान्।
अपस्मारहरस्मर्ता श्रुतिर्गाथा स्मृतिर्मनुः॥ 46 ॥

स्वर्गद्वारः प्रजाद्वारो मोक्षद्वारः कपीश्वरः।
नादरूपः परब्रह्म ब्रह्मब्रह्म पुरातनः॥ 47 ॥

एको नैको जनः शुक्लः स्वयंज्योतिरनाकुलः।
ज्योतिर्ज्योतिरनादिश्च सात्त्विको राजसत्तमः॥ 48 ॥

तमोहर्ता निरालम्बो निराकारो गुणाकरः।
गुणाश्रयो गुणमयो बृहत्कायो बृहद्यशाः॥ 49 ॥

बृहद्धनुर्बृहत्पादो बृहन्मूर्धा बृहत्स्वनः।
बृहत्कर्णो बृहन्नासो बृहन्नेत्रो बृहद्गलः॥ 50 ॥

बृहज्जानुर्बृहत्कायो बृहत्पुच्छो बृहत्करः।
बृहद्गतिर्बृहत्सेव्यो बृहल्लोकफलप्रदः॥ 51 ॥

बृहच्छक्तिर्बृहद्वाञ्छाफलदो बृहदीश्वरः।
बृहल्लोकनुतो द्रष्टा विद्यादाता जगद्गुरुः॥ 52 ॥

देवाचार्यः सत्यवादी ब्रह्मवादी कलाधरः।
सप्तपातालगामी च मलयाचलसंश्रयः॥ 53 ॥

उत्तराशास्थितः श्रीदो दिव्यौषधिवशः खगः।
शाखामृगः कपीन्द्रश्च पुराणः श्रुतिसञ्चरः॥ 54 ॥

चतुरो ब्राह्मणो योगी योगगम्यः परात्परः।
अनादिनिधनो व्यासो वैकुण्ठः पृथिवीपतिः॥ **55**॥

पराजितो जितारातिः सदानन्दश्च ईशिता।
गोपालो गोपतिर्गोप्ता कलिः कालः परात्परः॥ **56**॥

मनोवेगी सदायोगी संसारभयनाशनः।
तत्त्वदाता च तत्त्वज्ञस्तत्त्वं तत्त्वप्रकाशकः॥ **57**॥

शुद्धो बुद्धो नित्यमुक्तो युक्ताकारो जयप्रदः।
प्रलयोऽमितमायश्च मायातीतो विमत्सरः॥ **58**॥

मायानिर्जितरक्षश्च मायानिर्मितविष्टपः।
मायाश्रयश्च निर्लेपो मायानिर्वञ्चकः सुखः॥ **59**॥

सुखी सुखप्रदो नागो महेशकृतसंस्तवः।
महेश्वरः सत्यसन्धः शरभः कलिपावनः॥ **60**॥

रसो रसज्ञः सम्मानस्तपश्चक्षुश्च भैरवः।
घ्राणो गन्धः स्पर्शनं च स्पर्शोऽहङ्कारमानदः॥ **61**॥

नेतिनेतीति गम्यश्च वैकुण्ठभजनप्रियः।
गिरीशो गिरिजाकान्तो दुर्वासाः कविरङ्गिराः॥ **62**॥

भृगुर्वसिष्ठश्च्यवनस्तुम्बुरुर्नारदोऽमलः।
विश्वक्षेत्रं विश्वबीजं विश्वनेत्रश्च विश्वपः॥ **63**॥

याजको यजमानश्च पावकः पितरस्तथा।
श्रद्धा बुद्धिः क्षमा तन्द्रा मन्त्रो मन्त्रयुतः स्वरः॥ **64**॥

राजेन्द्रो भूपतिः कण्ठमाली संसारसारथिः।
नित्यः सम्पूर्णकामश्च भक्तकामधुगुत्तमः॥ **65**॥

गणपः कीशपो भ्राता पिता माता च मारुतिः।
सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ॥ **66** ॥

कामजित् कामदहनः कामः काम्यफलप्रदः।
मुद्रापहारी रक्षोघ्नः क्षितिभारहरोबलः ॥ **67** ॥

नखदंष्ट्रायुधो विष्णुभक्तोऽभयवरप्रदः।
दर्पहा दर्पदो दृप्तः शतमूर्तिरमूर्तिमान् ॥ **68** ॥

महानिधिर्महाभोगो महाभागो महार्थदः।
महाकारो महायोगी महातेजा महाद्युतिः ॥ **69** ॥

महाकर्मा महानादो महामन्त्रो महामतिः।
महाशयो महोदारो महादेवात्मको विभुः ॥ **70** ॥

रुद्रकर्मा क्रूरकर्मा रत्ननाभः कृतागमः।
अम्भोधिलङ्घनः सिंहो नित्योधर्मः प्रमोदनः ॥ **71** ॥

जितामित्रो जयः सामो विजयो वायुवाहनः।
जीवदाता सहस्रांशुर्मुकुन्दो भूरिदक्षिणः ॥ **72** ॥

सिद्धार्थः सिद्धिदः सिद्धसङ्कल्पः सिद्धिहेतुकः।
सप्तपातालभरणः सप्तर्षिगणवन्दितः ॥ **73** ॥

सप्ताब्धिसङ्गमो वीरः सप्तद्वीपोरुमण्डलः।
सप्ताङ्गराज्यसुखदः सप्तमातृनिषेवितः ॥ **74** ॥

सप्तलोकैकमकुटः सप्तहोता स्वराश्रयः।
सप्तच्छन्दोनिधिः सप्तच्छन्दः सप्तजनाश्रयः ॥ **75** ॥

सप्तसामोपगीतश्च सप्तपातालसंश्रयः।
मेधावीकीर्तिदः शोकहारी दौर्भाग्यनाशनः ॥ **76** ॥

सर्ववश्यकरो भर्गो दोषघ्नः पुत्रपौत्रदः।
प्रतिवादिमुखस्तम्भो दुष्टचित्तप्रसादनः॥ 77॥

पराभिचारशमनो दुःखघ्नो बन्धमोक्षदः।
नवद्वारपुराधारो नवद्वारनिकेतनम्॥ 78॥

नरनारायणस्तुत्यो नरनाथो महेश्वरः।
मेखली कवची खड्गी भ्राजिष्णुर्विष्णुसारथिः॥ 79॥

बहुयोजनविस्तीर्णपुच्छः पुच्छहतासुरः।
दुष्टग्रहनिहन्ता च पिशाचग्रहघातुकः॥ 80॥

बालग्रहविनाशी च धर्मो नेता कृपाकरः।
उग्रकृत्योग्रवेगश्च उग्रनेत्रः शतक्रतुः॥ 81॥

शतमन्युस्तुतः स्तुत्यः स्तुतिः स्तोता महाबलः।
समग्रगुणशाली च व्यग्रो रक्षोविनाशकः॥ 82॥

रक्षोग्नहस्तो ब्रह्मेशः श्रीधरो भक्तवत्सलः।
मेघनादो मेघरूपो मेघवृष्टिनिवारकः॥ 83॥

मेघजीवनहेतुश्च मेघश्यामः परात्मकः।
समीरतनयो बोद्धा तत्त्वविद्याविशारदः॥ 84॥

अमोघोऽमोघवृद्धिश्च इष्टदोऽनिष्टनाशकः।
अर्थोऽनर्थापहारी च समर्थो रामसेवकः॥ 85॥

अर्थीधन्यः सुरारातिः पुण्डरीकाक्ष आत्मभूः।
सङ्कर्षणो विशुद्धात्मा विद्याराशिः सुरेश्वरः॥ 86॥

अचलोद्धारको नित्यः सेतुकृद् रामसारथिः।
आनन्दः परमानन्दो मत्स्यः कूर्मो निधिः शमः॥ 87॥

वराहो नारसिंहश्च वामनो जमदग्निजः।
रामः कृष्णः शिवो बुद्धिः कल्की रामाश्रयो हरः॥ **88** ॥

नन्दी भृङ्गी च चण्डी च गणेशो गणसेवितः।
कर्माध्यक्षः सुराध्यक्षो विश्रामो जगतांपतिः॥ **89** ॥

जगन्नाथः कपिश्रेष्ठः सर्वावासः सदाश्रयः।
सुग्रीवादिस्तुतः शान्तः सर्वकर्मा प्लवङ्गमः॥ **90** ॥

नखदारितरक्षश्च नखायुधविशारदः।
कुशलः सुधनः शेषो वासुकिः तक्षकः स्वरः॥ **91** ॥

स्वर्णवर्णो बलाढ्यश्च रामपूज्योऽघनाशनः।
कैवल्यदीपः कैवल्यो गरुडः पन्नगो गुरुः॥ **92** ॥

किल्यारावहतारातिगर्वः पर्वतभेदनः।
वज्राङ्गो वज्रवेगश्च भक्तो वज्रनिवारकः॥ **93** ॥

नखायुधो मणिग्रीवो ज्वालामाली च भास्करः।
प्रौढप्रतापस्तपनो भक्ततापनिवारकः॥ **94** ॥

शरणं जीवनं भोक्ता नानाचेष्टो ह्यचञ्चलः।
सुखस्थोऽष्टास्यहा दुःखशमनः पवनात्मजः॥ **95** ॥

पावनः पवनः कान्तो भक्तागः सहनोबलः।
मेघनादरिपुर्मेघनादसंहृतराक्षसः॥ **96** ॥

क्षरोऽक्षरो विनीतात्मा वानरेशः सताङ्गतिः।
श्रीकण्ठः शितिकण्ठश्च सहायः सहनायकः॥ **97** ॥

अस्थूलस्त्वनणुर्भर्गो देवः संहृतिनाशनः।
अध्यात्मविद्यासारश्च अध्यात्मकुशलः सुधीः॥ **98** ॥

अकल्मषः सत्यहेतुः सत्यगः सत्यगोचरः।
सत्यगर्भः सत्यरूपः सत्यं सत्यपराक्रमः॥ **99** ॥

अञ्जनाप्राणलिङ्गश्च वायुवंशोद्भवः सुधीः।
भद्ररूपो रुद्ररूपः सुरूपश्चित्ररूपधृत्॥ **100** ॥

मैनाकवन्दितः सूक्ष्मदर्शनो विजयो जयः।
क्रान्तदिङ्मण्डलो रुद्रः प्रकटीकृतविक्रमः॥ **101** ॥

कम्बुकण्ठः प्रसन्नात्मा ह्रस्वनासो वृकोदरः।
लम्बोष्ठः कुण्डली चित्रमाली योगविदां वरः॥ **102** ॥

विपश्चित्कविरानन्दविग्रहोऽनन्यशासनः।
फाल्गुनीसूनुरव्यग्रो योगात्मा योगतत्परः॥ **103** ॥

योगवेद्यो योगकर्ता योगयोनिर्दिगम्बरः।
अकारादिक्षकारान्तवर्णनिर्मितविग्रहः॥ **104** ॥

उलूखलमुखः सिंहः संस्तुतः परमेश्वरः।
श्लिष्टजङ्घः श्लिष्टजानुः श्लिष्टपाणिः शिखाधरः॥ **105** ॥

सुशर्माऽमितशर्मा च नारायणपरायणः।
जिष्णुर्भविष्णू रोचिष्णुर्ग्रसिष्णुः स्थाणुरेव च॥ **106** ॥

हरी रुद्रानुकृद्वृक्षकम्पनो भूमिकम्पनः।
गुणप्रवाहसूत्रात्मा वीतरागः स्तुतिप्रियः॥ **107** ॥

नागकन्याभयध्वंसी रुक्मवर्णः कपालभृत्।
अनाकुलो भवोपायोऽनपायो वेदपारगः॥ **108** ॥

अक्षरः पुरुषो लोकनाथो रक्षः प्रभुर्दृढः।
अष्टाङ्गयोगफलभुक् सत्यसन्धः पुरुष्टुतः॥ **109** ॥

श्मशानस्थाननिलयः प्रेतविद्रावणक्षमः।
पञ्चाक्षरपरः पञ्चमातृको रञ्जनध्वजः॥ **110** ॥

योगिनीबृन्दवन्द्यश्च शत्रुघ्नोऽनन्तविक्रमः।
ब्रह्मचारीन्द्रियरिपुर्धृतदण्डो दशात्मकः॥ **111** ॥

अप्रपञ्चः सदाचारः शूरसेनविदारकः।
वृद्धः प्रमोदश्चानन्दः सप्तजिह्वापतिर्धरः॥ **112** ॥

नवद्वारपुराधारः प्रत्यग्रः सामगायकः।
षट्चक्रधामा स्वर्लोकोभयहृन्मानदोऽमदः॥ **113** ॥

सर्ववश्यकरः शक्तिर्नेता चानन्तमङ्गलः।
अष्टमूर्तिधरो नेता विरूपः स्वरसुन्दरः॥ **114** ॥

धूमकेतुर्महाकेतुः सत्यकेतुर्महारथः।
नन्दिप्रियः स्वतन्त्रश्च मेखली समरप्रियः॥ **115** ॥

लोहाङ्गः सर्वविद्धन्वी षट्कलः शर्व ईश्वरः।
फलभुक् फलहस्तश्च सर्वकर्मफलप्रदः॥ **116** ॥

धर्माध्यक्षो धर्मफलो धर्मो धर्मप्रदोऽर्थदः।
पञ्चविंशतितत्त्वज्ञस्तारकब्रह्मतत्परः॥ **117** ॥

त्रिमार्गवसतिर्भीमः सर्वदुःखनिबर्हणः।
ऊर्जस्वान् निर्गलः शूली माली गर्भो निशाचरः॥ **118** ॥

रक्ताम्बरधरो रक्तो रक्तमालाविभूषणः।
वनमाली शुभाङ्गश्च श्वेतः श्वेताम्बरो युवा॥ **119** ॥

जयो जयपरीवारः सहस्रवदनः कपिः।
शाकिनीडाकिनीयक्षरक्षोभूतौघभञ्जनः॥ **120** ॥

सद्योजातः कामगतिर्ज्ञानमूर्तिर्यशस्करः।
शम्भुतेजाः सार्वभौमो विष्णुभक्तः प्लवङ्गमः॥ **121** ॥

चतुर्नवतिमन्त्रज्ञः पौलस्त्यबलदर्पहा।
सर्वलक्ष्मीप्रदः श्रीमानङ्गदप्रिय ईडितः॥ **122** ॥

स्मृतिर्बीजं सुरेशानः संसारभयनाशनः।
उत्तमः श्रीपरीवारः श्रीभूदुर्गाच कामदृक्॥ **123** ॥

सदागतिर्मातरिश्वा रामपादाब्जषट्पदः।
नीलप्रियो नीलवर्णो नीलवर्णप्रियः सुहृत्॥ **124** ॥

रामदूतो लोकबन्धुरन्तरात्मा मनोरमः।
श्रीरामध्यानकृद्वीरः सदा किंपुरुषस्तुतः॥ **125** ॥

रामकार्यान्तरङ्गश्च शुद्धिर्गतिरनामयः।
पुण्यश्लोकः परानन्दः परेशः प्रियसारथिः॥ **126** ॥

लोकस्वामी मुक्तिदाता सर्वकारणकारणः।
महाबलो महावीरः पारावारगतिर्गुरुः॥ **127** ॥

समस्तलोकसाक्षी च समस्तसुरवन्दितः।
सीतासमेत श्रीरामपादसेवाधुरन्धरः॥ **128** ॥

वाल्मीकिरुवाच
इति नाम्नां सहस्रेण स्तुतो रामेण वातभूः।
उवाच तं प्रसन्नात्मा सन्धायात्मानमव्ययम्॥ **129** ॥

श्रीहनुमानुवाच
ध्यानस्येदमिदं ब्रह्म मत्परं समुपस्थितः।
स्वामिन् दयानिधे राम ज्ञातोऽसि कपिना मया॥ **130** ॥

त्वद्ध्याननिरता लोके किं न पश्यन्ति सादरम्।
तवागमनहेतुश्च ज्ञातः शत्रुर्मयानघ॥ 131 ॥

कर्तव्यं मम किं राम तथापि ब्रूहि राघव।
इति प्रचोदितो रामः प्रहृष्टात्मेदमब्रवीत्॥ 132 ॥

श्रीराम उवाच
दुर्जनः खलु वैदेहीं गृहीत्वा कोऽपि निर्गतः।
हत्वा तमासुरं वीरमानयस्व कपीश्वर॥ 133 ॥

मम दास्यं कुरु सखे भव विश्वसुखङ्करः।
तस्याज्ञां शिरसा तस्य गृहीत्वा स कपीश्वरः॥ 134 ॥

विधेयं विधिवत्तत्र चकार शिरसा स्वयम्।
इदं नामसहस्रं तु योऽधीते प्रत्यहं नरः॥ 135 ॥

दुःखौघं नश्यते तस्य संपत्तिर्वर्धते चिरम्।
वश्यं चतुर्विधं तस्य भवत्येव न संशयः॥ 136 ॥

राजानो राजपुत्राश्च राजकीयाश्च मन्त्रिणः।
त्रिकालपठनात्तस्य सिद्धिः स्यात्करसंस्थिता॥ 137 ॥

ब्राह्मे मुहूर्ते चोत्थाय प्रत्यहं यः पठेन्नरः।
ऐहिकामुष्मिकं सोऽपि लभते नात्र संशयः॥ 138 ॥

सङ्ग्रामसन्निविष्टानां वैरिविद्रावणं परम्।
ज्वरापस्मारशमनं गुल्मादिप्लीहवारणम्॥ 139 ॥

साम्राज्यसुखसंपत्तिदायकं जपतां नृणाम्।
य इदं पठते नित्यं पाठयेद्वा समाहितः॥ 140 ॥

सर्वान् कामानवाप्नोति वायुपुत्रप्रसादतः।
किमत्र बहुनोक्तेन नान्यथा रामभाषितम्॥ **141** ॥

यदिच्छेत् प्रत्यहं द्रष्टुं प्रयोक्तव्योऽयमद्भुतम्।
कार्यसंसिद्धिरत्यर्थं सत्यं सत्यं वचो मम॥ **142** ॥

॥ इति श्रीहनुमत्सहस्रनामस्तोत्रं समाप्तम्॥